कक्षा-10वी - विषय-प्राचीन व्याकरणम् (विषय कोड-1002)

## अष्टाध्यायी - तृतीयचतुर्थौ अध्यायौ

कक्षा-10वी

1

दिनांक : ..............................

(क) अतिलघूत्तरीयाः प्रश्नाः :-

1. "सन्" प्रत्ययविधायकं सूत्रं लिखत? गुप्तिज्किद्भ्यः सन्।
2. सत्यापपाशादिशब्देभ्यः कः प्रत्ययः भवति? णिच्।
3. तव्यत् प्रत्ययविधायकं सूत्रं लिखत? तव्यत्तव्यानीयरः।
4. गदमदादिधातुभ्यः किं विधीयते? यत्।
5. "प्रस्नः" "स्नुलः" इत्यत्र कः प्रत्ययः? कः।
6. खजि धातोः कः प्रत्ययः भवति? खश्।
7. सोमयाजी इत्यत्र कः प्रत्ययः? णिनि।
8. पितृघाती इत्यस्य विग्रहं कुरुत? पितरं हतवान्।
9. "सरोजम्" इत्यत्र कः धातुः? जनि
10. परोक्षार्थे कः लकारः भवति? लिट्।
11. अभिज्ञावचने कः लकारः भवति? लृट्।
12. लट्लकारः कस्मिन्नर्थे भवति? वर्तमाने।
13. ग्स्नुः प्रत्ययविधायकं सूत्रं लिखत? ग्लाजिस्थश्च ग्स्नुः।
14. स्पृहिगृहिपतिदयि-- सूत्रेण कः प्रत्ययः भवति? आलुच्।
15. घुरच् प्रत्ययविधायकं सूत्रं लिखत? भञ्जभासमिदो घुरच्।
16. जागरूकः इत्यत्र कः प्रत्ययः अस्ति? ऊक्।
17. भावे कः प्रत्ययः भवति? घञ्।
18. परिघः, पलिघः कस्य प्रत्ययस्योदाहरणम्? घः।
19. स्वप्नः इत्यत्र कः प्रत्ययः? नन्।
20. लङ्वत् कः लकारः भवति? लोट्।
21. "झि" इत्यस्य कः आदेशो भवति? जुस्।
22. सुप् प्रत्याहारे कति प्रत्ययाः सन्ति? 21
23. सुप्प्रत्ययः कस्मात् भवति? ङ्याप्प्रातिपदिकात्।
24. टाप् प्रत्ययविधायकं सूत्रं लिखत? अजाद्यतष्टाप्।
25. अष्टाध्यायी इत्यत्र कः प्रत्ययः अस्ति?
26. कुमारी इत्यत्र केन सूत्रेण ङीप् प्रत्ययो भवति? वयसि प्रथमे।
27. गौरादिभ्यः कः प्रत्ययः भवति? ङीष्।
28. "तस्यापत्यम्" कीदृशं सूत्रं वर्तते? अधिकार सूत्रम्।

शिक्षक के हस्ताक्षर : ..............................

(29) नाडायन! इत्यत्र क! प्रत्यय! ? फक् ।

(30) गर्गादिभ्य! क! प्रत्यय! भवति ? यञ् ।

(31) शैव!, गाङ्गः स्नैल! इत्यादिषु क! प्रत्यय ? अण् ।

(32) वैनतेय! इत्यत्र केन सूत्रेण ढक् प्रत्ययो भवति ? स्त्रीभ्यो ढक् ।

(33) शुभ्रादिभ्यश्च इति सूत्रं किं विधीयते ? ढञ् ।

(34) श्वशुर्य! इत्यत्र क! प्रत्यय! ? यत् ।

(35) कुलात् क! प्रत्ययो भवति ? ख

(36) महाकुलात् (महाकुलशब्दात्) कौ प्रत्ययौ भवत! ? अञ्खञौ

(37) तिकादिभ्य! क! प्रत्यय! ? फिञ् ।

(38) "युवा" संज्ञाविधायकं सूत्रं लिखत ? जीवति तु वंश्ये युवा ।

(39) पाञ्चाल! इत्यत्र क! प्रत्यय! ? अञ् ।

(40) पौष! इत्यत्र क! प्रत्यय! ? अण् ।

(41) शुभ्राद् घन् प्रत्यय! कस्मिन् अर्थे भवति ? बह्वर्थे ।

(42) आग्नेय! इत्यत्र क! प्रत्यय अस्ति ? ढक् ।

(43) तल् विधायकं सूत्रं लिखत ? ग्रामजनबन्धुभ्यस्तल् ।

(44) कुक् आगमविधायकं सूत्रं लिखत ? नडादीनां कुक् च ।

(45) वृक्षात् क! प्रत्यय! भवति ? छ! ।

(46) कस्मिन् वचने तवकममकौ आदेशौ भवत! ? एकवचने

(47) वासन्तिक! इत्यत्र क! प्रत्यय अस्ति ? ठञ् ।
* आम / न लिखत —

(48) ग्रामीण: इत्यत्र ख! प्रत्यय! अस्ति ? आम्

(49) दौहित्रक! इत्यत्र वुञ् प्रत्यय! अस्ति ? न ठञ् ।

(50) मायूर! इत्यत्र अण् प्रत्यय! अस्ति ? आम्

* युग्ममेलनं कुरुत —
51 औपकर्णिकः — ठक्।
52 वासन्तकम् — वुञ्।
53 राष्ट्रियः — घः।
54 प्रादोषः — अण्।
55 सांवत्सरिकम् — ठञ्।
56 दन्त्यम् — यत्।

* रिक्तस्थानानि पूरयत —
57 शम्याः ---- । ट्लञ्।
58 जातरूपेभ्यः ---- । परिमाणे।
59 ---- तत्प्रत्ययात्। ञितश्च।
60 किशरादिभ्यः ---- । ष्ठन्।
61 सभ्यः इत्यत्र कः प्रत्ययः अस्ति? य
62 "सतीर्थ्यः" यत् प्रत्ययविधायकं सूत्रं लिखत? समानतीर्थे वासी।
63 "हननी" अर्थे कः प्रत्ययः भवति? यत्।
64 "मासतन्वोः" यत् प्रत्ययः कस्मिन् अर्थे भवति? मत्वर्थे।
65 शिवतातिः इत्यत्र कः प्रत्ययः अस्ति? तातिल्।

## (ख) लघूत्तरीयः प्रश्नाः

66 प्रत्ययः इत्यस्य अधिकारक्षेत्रं लिखत?
67 समानकर्तृकस्य तात्पर्यं लिखत?
68 क्रियासमभिहारस्य अर्थं लिखत?
69 "गोपायति" इत्यत्र आय् प्रत्ययविधायकं सूत्रं लिखत?
70 सनादयः कति प्रत्ययाः सन्ति?
71 भुवः भूः च इति सूत्रेण किं भवति?
72 धातोः कीदृशं सूत्रं वर्तते?
73 कृत् संज्ञाविधायकं सूत्रं लिखत? कृदतिङ्

74- ऋहलोः कः प्रत्ययः भवति ?
75- कस्मिन् उपपदे सति शीधातोः अच् प्रत्ययः भवति ?
76- कर्मणि उपपदे सति हन् धातोः कः प्रत्ययः भवति ?
77- लुङ् लकारः कस्मिन् कालार्थे भवति ?
78 विभाषा इत्यस्य अर्थं लिखत ?
79 सम्बोधने च इति सूत्रं किं विधीयते ?
80 जागरूकः इत्यत्र कः धातुः ?
81 भूतेऽपि किं दृश्यन्ते ? उणादयः।
82 "नित्यं पणः परिमाणे" इत्यनेन सूत्रेण किं भवति ?
83 नङ् प्रत्ययविधायकं सूत्रं लिखत ?
84 दुर्योधनः इत्यस्य विग्रहं कुरुत ?
85 दुःशासनः इत्यत्र कः प्रत्ययः अस्ति ?
86 हेतुहेतुमद्भावे कः लकारः भवति ?
87 आभीक्ष्ण्ये अर्थे कः प्रत्ययः भवति ?
88 कृत् प्रत्ययाः कस्मिन् अर्थे भवन्ति ?
89 तिबादयः कति प्रत्ययाः सन्ति ?
90 तङ् प्रत्याहारे समागतानां प्रत्ययानां नामानि लिखत ?
91 लङ्वत् कः लकारः भवति ?
92 सन् आदेशः कस्य भवति ?
93 ङ्याप्प्रातिपदिकात् इत्यत्र "ङी" इत्यनेन केषां ग्रहणं भवति ?
94 सुप् इत्यस्य का संज्ञा केन सूत्रेण च भवति ?
95 "नदी" इत्यत्र ङीप् प्रत्ययविधायकं सूत्रं लिखत ?
96 भद्रबाहु इत्यत्र ऊङ् प्रत्ययः केन सूत्रेण भवति ?
97 "बहुयुवा नगरी" युवन् शब्दात् तिः प्रत्ययः कथं न भवति ?
98 "हारितायनः" इत्यत्र कः प्रत्ययः अस्ति ?
99 माण्डूकेयः इत्यत्र ढक् प्रत्ययविधायकं सूत्रं लिखत ?
100 कुलात् कः प्रत्ययः भवति ?
101 "तेन रक्तं रागात्" इत्यत्र तेन शब्दस्य भावार्थं लिखत ?
102 "पितामहः" इत्यस्य विग्रहं लिखत।
103 "अमा" इति अव्ययात् कः प्रत्ययः भवति ?
104 शालीयः, मालीयः इत्यत्र कः प्रत्ययः अस्ति ?

दिनांक : 5

105 कुत्सनशब्दस्य अर्थं लिखत ?
106 बृहत्संज्ञकप्रातिपदिकात् कः प्रत्ययः भवति ?
107 "सान्द्रयम्" इत्यत्र कः प्रत्ययः भवति ?
108 ट्युट्युलौ प्रत्ययौ केभ्यः भवतः ?
109 आश्वयुजका: (माषा:) इत्यस्य विग्रहं लिखत ?
110 कर्णललाटात् कस्मिन् वाच्ये सति कन् प्रत्ययो भवति ?
111 "वाक्यपदीयम्" इत्यस्य विग्रहं कुरुत ?
112 "अवयवे च प्राण्योषधिवृक्षेभ्यः" सूत्रस्य व्याख्यां कुरुत ?
113 प्राग्वहतेष्ठक् सूत्रस्य पदच्छेदं कुरुत ?
114 "गुणग्रामः" इत्यत्र कः प्रत्ययः अस्ति ?
115 स्वस्त्रादिगणे कति: शब्दा: सन्ति ?
116 सुचर्मा (मृगी) इत्यत्र ङीप् प्रत्ययः कथं न भवति ?
117 टिड्ढाणञ्--- इत्यस्मिन् सूत्रे कति प्रत्ययाः सन्ति ?
118 छन्दसि केवलादिप्रातिपदिकेभ्यः कः प्रत्ययो भवति ?
119 "पत्नी" इत्यत्र नकारान्तादेशः केन सूत्रेण भवति ?
120 विभाषा कतिधा, नामानि लिखत ?
121 "अश्वपत्यादिभ्यश्च" इत्यस्य सूत्रस्य उदाहरणानि लिखत ?
122 "एको गोत्रे" कीदृशं सूत्रं वर्तते ?
123 ञ्यप्रत्ययविधायकं सूत्रं लिखत ?
124 आख्यातिकः, इत्यत्र ठक् प्रत्ययः केन सूत्रेण भवति ?
125 वासुदेवकः इत्यस्य विग्रहं कुरुत ?
126 संसृष्टशब्दस्य अर्थं लिखत ?
127 नौवयोधर्म--- इत्यस्मिन् सूत्रे कति प्रातिपदिकानि सन्ति ?
128 मासतन्वो: यत् प्रत्ययः कस्मिन्नर्थे भवति ?
129 आकर्षप्रातिपदिकात् कः प्रत्ययो भवति ?
130 शिवताति: इत्यत्र कः प्रत्ययः अस्ति ?

शिक्षक के हस्ताक्षर : ..........

# दीर्घ-उत्तरीया: प्रश्ना:

1. ससूत्रं "जिगीषति" प्रयोगसिद्धिं कुरुत ?
2. रूपयति प्रयोगसिद्धिं ससूत्रं कुरुत ?
3. कति कृत्यसंज्ञका: प्रत्यया:, तेषां सोदाहरणानि नामानि लिखत ?
4. "छन्दसि निष्टर्क्य---" सूत्रं प्रपूरयत ?
5. "अनद्यतने लङ्" इत्यत्र अनद्यतनशब्दस्य किं तात्पर्यं सोदाहरणं लिखत ?
6. सम्पृचानुरुधाङ्--- सूत्रं प्रपूरयत ?
7. "उणादयो बहुलम्" सूत्रस्य व्याख्यां कुरुत ?
8. बहुलस्य कतिधा प्रवृत्ति: भवति लिखत ?
9. गमिष्यामि प्रयोगस्य ससूत्रं सिद्धिं कुरुत ?
10. "अजाया:" इत्यस्य प्रयोगस्य सिद्धिं कुरुत ?
11. "स्त्रियाम्" इत्यधिकारसूत्रे कति प्रत्यया: सन्ति, तेषां नामानि लिखत ?
12. जानपदकुण्डगोणस्थल--- इति सूत्रं प्रपूरयत ?
13. "ङ्याप्प्रातिपदिकात्" इत्यत्र ङ्याप्शब्देन केषां प्रत्ययानां ग्रहणं भवति- तेषां सोदाहरणानि नामानि लिखत ?
14. विग्रहपूर्वकं "वैयाकरण-" शब्दस्य प्रयोगसिद्धिं कुरुत ?
15. शेषे सूत्रस्य व्याख्यां कुरुत ?
16. "कुरुचर:" प्रयोगस्य विग्रहपूर्वकं सिद्धिं (ससूत्रम्) कुरुत ?
17. वुञ्छण्--- सूत्रं प्रपूरयत ?
18. "शौचिवृक्ष्या" इत्यस्मिन् प्रयोगे ष्यङ् प्रत्यय: केन सूत्रेण भवति तत्सूत्रं लिखत ?
19. "युष्मदीय:" इत्यस्य ससूत्रं प्रयोगसिद्धिं कुरुत ?
20. नौवयोधर्म--- सूत्रं प्रपूरयत ?

डा. कमलेश कुमार पाण्डेय,
मा. शिक्षक,
शास. हाईस्कूल बिड़ला कॉलोनी, सतना
(म.प्र)
मो. 8878502507